International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(4): 30-33
© 2016 IJSR
www.anantaajournal.com
Received: 11-05-2016
Accepted: 12-06-2016

डा. सुशान्तकुमारराजः
साहित्यविभागः, राष्ट्रिय-संस्कृत-संस्थानम्(मा.वि),श्रीसदाशिवपरिसरः पुरी, ओडिशा, भारत।

# कालिदाससाहित्ये पर्यावरणचिन्तनम्

## डा. सुशान्तकुमारराजः

## प्रस्तावना

संस्कृतसाहित्यजगति ये ये स्वनामधन्या महाकवयः प्रतिष्ठिताः सन्ति तेषु कविकुलगुरोः महाकवेः कालिदासस्य स्थानं वर्तते सर्वोपरि । तेन विरचितानि सप्तकाव्यानि प्रसिद्धानि सन्ति । तेषु सप्तकाव्येषु मालविकाग्निमित्रं विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलञ्चेति त्रीणि दृश्यकाव्यानि रघुवंशमहाकाव्यं कुमारसम्भवमहाकाव्यं मेघदूतं ऋतुसंहारञ्चेति चत्वारि श्रव्यकाव्यानि सन्ति । एतानि काव्यरत्नानि विविधवैशिष्ट्यदृष्ट्या यथा विश्वविख्यातानि सन्ति तथैव महाकविर्कालिदसोऽपि विश्ववन्दितः अद्वितीयकवीश्वरश्चास्ति। तदुक्तं प्रसिद्धाभियुक्तवचनम्-

> **पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।**
> **अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ।।**[1] **इति ।**

'**सहितानां काव्यानां समष्टिरेव साहित्यमि**'[2]ति व्युत्पत्यनुसारेण कालिदासप्रणीतानां दृश्यश्रव्यकाव्यानामपि समाहारेण विनिर्मितं विशिष्टसाहित्यं कालिदाससाहित्यमिति उच्यते । अस्मिन् साहित्ये यथा रसध्वन्यादिसम्बलित-भावपक्षस्य गम्भीरताऽनुभूयते तथैव रीतिगुणालङ्काराणां चमत्कारिताऽप्यवलोक्यते सहृदयैः। एतत्सर्वं वैशिष्ट्यं विहाय कविकुलगुरुरयं प्राकृतिकवैभवमपि जीवन्तरूपेण स्वकाव्येषु प्रकटीकरणे अतीवनिपुणः आसीदिति तत्तत्काव्यानां परिशीलनेनावगम्यते । अतः कालिदाससाहित्ये विद्यमानं पर्यावरणचिन्तनमन्वेषयितुं प्रबन्धेऽस्मिन् प्रयत्नो विधीयते ।

## पर्यावरणम्-

**परि** तथा **आ** उपसर्गपूर्वकं **वृञ्** इति धातोः **ल्युट्**प्रत्ययेन **पर्यावरणमि**ति पदं निष्पद्यते, यस्यार्थो भवति परितः आवृणोति इति । अत्र कान् परितः कीदृशमावरणमिति जिज्ञासायां सामान्यतोऽवगम्यते यत् मानवादिप्राणिजगत् परितः विद्यमानानि पञ्चमहाभूतानि, मनः, बुद्धिः, अहङ्कारश्चेति प्रकृतेः अष्टतत्त्वानि एव पर्यावरणपदवाच्यानि भवन्तीति साक्षाद्भगवता श्रीकृष्णेनाभिहितम्। तदुक्तं श्रीमद्भगवद्गीतायाम्-

> **भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।**
> **अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ।।**[3] इति।

न केवलं श्रीमद्भगवद्गीतायामथवा उपनिषत्सु मञ्चमहाभूतानां संरक्षणचर्चा वर्तते अपितु वैदिकवाङ्मये पर्यावरणसन्तुलनिमित्तं मुनयः भगवन्तं परमेश्वरं प्रार्थयन्ति स्म। ऋग्वेदस्य प्रथममण्डले ऋषिगौतमः कामयति, यत्-

> **मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।**
> **मध्वीर्नः सन्त्ववोषधीः।।**
> **मधु नक्तमुषसो मधुमत् पार्थिं सजः।**
> **मधु द्यौरस्तु नः पिता ।।**
> **मधुमान् नो वनस्पतिर्मधुमाँ अस्तु सूर्यः।**
> **माध्वीर्गावो भवन्तु नः।।**[4] इति।

Correspondence
डा. सुशान्तकुमारराजः
साहित्यविभागः, राष्ट्रिय-संस्कृत-संस्थानम्(मा.वि),
श्रीसदाशिवपरिसरः पुरी, ओडिशा, भारत।

मन्त्रेऽस्मिन् वायु-जल-औषधि-वृक्ष-रात्रि-प्रभात-पृथिव्यन्तरिक्षतेजांसि माध्यमेन स्वच्छपर्यावरणस्यानुचिन्तनं क्रियते मुनिना । अतोऽत्र पृथिवी-लज-तेजोवायुराकाशश्चेत्येतेषां पञ्चमहाभूतानां नस्तुलनं निमित्तं प्रार्थना क्रियते । यजुर्वेदेऽपि पञ्चमहाभूतानां सन्तुलनं निमित्तं प्रार्थना क्रियते, यथा-

**शं नो वातः पवतां शं नस्तपतु सूर्यः।**
**शं नः कनिक्रदद् देवः पर्जन्यो अभिवर्षतु॥**[5] इति।

किञ्चास्य वैदिकसाहित्यस्य प्रभावेण महाकविर्कालिदासोऽपि स्वकीये काव्य-महाकाव्य-नाटकादिमाध्यमेन सामाजिकानां समीपे पर्यावरणभावनां समुद्घाटयति।

**कालिदासकाव्येषु पर्यावरणम्-**

महाकवेः कालिदासस्य पर्यावरणविषये अतीव सहानुभूतिरासीदिति तत्प्रणीतानि काव्यानि नाटकानि च पर्यालोचनेन ज्ञायते । अयं कविः न केवलं पर्यावरणेन सह परिचतः आसीत्, अपितु तस्यातीव निकटतरः आसीत् । अतोऽयं प्रकृतिकविरित्यपि कथ्यते समालोचकैः। मेघदूते खण्डकाव्ये मेघः जीवितप्राणिरूपेण वर्णितस्तथा यक्षमुखेन तेन सह वार्तालापोऽपि कृतः। किञ्च रामगिरौ विद्यमानस्य अभिशप्तयक्षस्य अतिगोपनीयवार्ता मेघमाध्यमेन अलकापुर्यां विद्यमानां यक्षप्रियां प्रति प्रेषिता । तत्र भावविह्वलो भूत्वा वर्णितं कविवरेण-

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः**
**सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्त्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु॥**[6] इति।

अत्र कालिदासेन कल्पितनायको यक्षः सन्देशप्रापणार्थं पर्यावरणेष्वन्यतमम् अचेतनं मेघं निवेदयति । इयमेवास्ति विप्रलम्भस्य परावस्थायाः स्थितिः। मेघस्य सर्वाण्यप्युपादानतत्त्वानि नितान्तम् अचेतनानि सन्ति । स्वयं कालिदासेन एव एतन्निगदितं यत्- धूमः,ज्योतिः, सलिलं, मरुच्च एतेषामचेतनतत्त्वानां समाहारेण निर्मितः मेघः न कदापि वार्तावहो भवितुं समर्थोऽस्ति । भावविह्वलोऽयं कालिदासः काल्पनिकयक्षचरितमाध्यमेन यदा प्रकृतिगर्भे लीनो भवति तदा तस्य बुद्धिः चेतनाचेतनविवेकविहीना संजाता, अतः तेन सुस्पष्टमेवोक्तं यत्- कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु इति । अर्थात् प्रियाविरहविक्षिप्ताः कामार्तजनाः सर्वदा चेतनाचेतनेषु प्रकृतिकृपणा भवन्ति । तादृशी विवेकक्षमता भेदाभेदस्थापनक्षमता वा तेषां जनानां सर्वथा विलुप्यते । इयमेव चेतनाऽचेतनं चेतनाराहित्यं चेतनाचेतनप्रकृतिकार्पण्यं वा कालिदसदृष्ट्या विप्रलम्भशृङ्गारस्य परावस्था पराकाष्ठा वेति प्रतीयते । तदर्थं हि कामार्तत्वं नाम चेतना ऽचेतनप्रकृतिकृपणत्वमेव इति ज्ञायते ।

मेघदूतस्यास्य प्रथमे श्लोके कश्चित्कान्ताविरहगुरूणा इत्यत्र स्निग्धच्छायातरुषु इति विशेषणपदं तथा रामगिर्याश्रमेषु इति विशेष्यपदस्य कृते प्रयुनक्ति। अत्रास्ति पर्यावरणविज्ञानस्य प्रसारस्थलम् । रामगिरौ ये आश्रमाः (गृहाः) अवर्तन्त, तान् परितः विविधाः तरवोऽप्यासन्, ये सर्वदा स्निग्धच्छायां प्रयच्छन्ति । स्निग्धाः सान्द्राः छायातरवः येषु इति बहुव्रीहिसमासः। कालिदासस्य वर्णनादस्माज्ज्ञायते यत् तदा कवेः समये पर्वताः संख्यातीतैः वृक्षैः परिवृत्ताः आसन्। अतः तत्र मेघः सर्वदैव वर्षति, यस्मात् पर्वतात् निर्झरी नर्गताऽस्ति । त्रेतया युगे सीतादेवी तत्र निर्झरण्यां स्नानं करोति स्म । विज्ञानमपि वृक्षाणां सद्भावे वृष्टिः, तेषामभावे च अनावृष्टिर्भवतीति स्पष्टं मतमुपस्थापयति। अद्यत्वे पर्वताः वृक्षविहीनाः हतशोभाश्च दृश्यन्ते। नर्झरी शुष्कत्वात् न झङ्कुरिति भवति। तादृशवृष्टिरपि समीपस्थे जनपदे नैव भवति। अतः समुचितेयं शिक्षा कविना काव्येषु वर्णिता दृश्यते। तेषां काव्यानामध्ययनेन पर्यावरणविषयकं ज्ञानं सञ्जायते। अनेकवृक्षयुक्तत्वात् रामगिरौ मेघः अश्लिष्टसानुः दृष्टः, यं मेघं यक्षः आषाढस्य प्रथमदिवसे दृष्टवान् । इत्थं मेघदूतस्य अन्तिमं यावत् पर्यावरणस्यैव चर्चा अक्षिलक्षी भवति। किं बहुना कालिदासस्य सर्वा अपि कृतयः पर्यावरणरक्षणाय चेतयन्ति सकलसहजदयजनान् ।

क्रान्तदर्शी महाकविः कालिदासः यद्यपि काव्यं रिरचयिषया काव्यत्वं नाट्यत्वं च विदधाति, तथापि भारतीयसामाजिकानां मानसिकीं स्थितं ज्ञात्वा तान् सर्वान् समस्यामुक्तान् कर्तुं प्रयतते । यद्यपि पञ्चमहाभूतानां वर्णनं कालिदासेन पर्यावरणधिया नैव कृतं तथापि भारतीयसंस्कृतेः औदार्यमेतदेवास्ति, यत्- तस्य वर्णनमेव पर्यावरणं प्रकाशयति । यथा चानेन महाकविना अभिज्ञानशाकुन्तलस्य मङ्गलाचरणव्याजेन ईश्वरस्य अष्टौ मूर्तयः कल्पिताः-

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥**[7] इति।

नान्दीपद्येऽस्मिन् ईश्वरस्य प्रकृतिरूपा अष्ट मूर्तयः वर्णिताः सन्ति । तत्र सूर्यस्य चन्द्रमसश्च पर्यावरणशुद्ध्यै महत्त्वं योगदानं वर्तते इति को वा न जानाति । यजमानः यज्ञकर्मायोजनेन पर्यावरणं शोधयति । पुनश्च पञ्चमहाभूताः साम्यत्वेन पञ्चीकरणतया सर्वेषां स्थितिं दधतीति सर्वविदितमेव ।

महाकवेः कालिदासस्य काव्येषु नाटकेषु च तपोवनवर्णनमपि अभीष्टमासीत् । युगे युगे विविधप्रकारकवृक्षैः लताभिश्च मानवाः लाभान्विता भवन्ति । तेषां तासां च वर्णने कविरयं सर्वदैव तत्परो भवतीति अभिज्ञानशाकुन्तलात् मालविकाग्निमित्राच्च सम्यक् ज्ञायते । वृक्षारोपणम्, वृक्षावसेचनम्, वृक्षपोषणम्, लतानां यत्नीकरणञ्च कवेरस्य वर्णनाया मूलस्रोतांसि सन्ति । मालविकाग्निमित्रे वृक्षारोपणवर्णनमतीव महत्त्वपूर्णमस्ति, यथा-

**अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।**
**नवसंरोपणशिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥**[8] इति।

अभिज्ञानशाकुन्तले नाटकेऽपि वृक्षाणां रोपणं, सेचनं, वर्धनञ्च विषये अतीवमहत्त्वपूर्णवर्णनं प्राप्यते, यथा-

**कुल्याम्भोभिः प्रकृतिचपलैः शाखिनो धौतमूलाः।**
**भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन॥**[9] इति।

एवम् एवाग्रे राजा दुष्यन्तोऽपि कथयति-

**एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः।**
**सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते॥**[10] इति।

एतैर्वर्णनैः वात्सल्यवर्धनाय विविधवृक्षैस्सह पारिवारिकीं प्रीतिं च समुत्पादयितुं तेषां वृक्षाणाम् अवचेतनं पालनमित्यादिकमत्र कविवरेण कल्पितम् । इमामेव भावनामङ्गीकृत्य अनसूयामुखेन शकुन्तलां प्रति कालिदासः वक्ति- **'हला ! शकुन्तले ! त्वत्तोऽपि तातकर्णस्याश्रमवृक्षकाः प्रियतरा इति तर्कयामि। येन नवमालिका कुसुमपेलवा त्वमप्येतेषामालवालपरणे नियुक्ता'**[11] इति । एतत् श्रुत्वा शकुन्तलाऽपि स्वीकरोति यत्- **'न केवलं तातनियोग एव, अस्ति मे सोदरस्नेहोऽप्येतेषु'**[12] इति ।

पतिगृहगमनावसरेऽपि शकुन्तला पूर्वस्नेहं स्मृत्वा कर्णमुक्तवती यत् **'तात ! लताभगिनीवनज्योत्सां तावदामन्त्रयिष्ये'**[13] इति। ततः कर्णमुनिरपि तज्ज्ञात्वा कथयति यत् – **'अवैमि ते तस्यां सोदर्यस्नेहम्। इयं तव दक्षिणेन'** । शकुन्तला-(उपेत्य लतामालिंग्य) **वनज्योत्से ! चूतसङ्गताऽपि मां प्रत्यालिङ्गेतोगताभिः शाखाबाहुभिः। अद्य प्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि'**[14] इति ।

कालिदासस्य वर्णनानुसारेण शकुन्तला प्रकृतिपेलवा अस्ति । वृक्षलताभिः सह तस्या वर्तते सोदरस्नेहः । इयं तैस्तह वार्तालापं करोति । तेषां नामकरणमपि करोति । वनस्पतीनां सम्वर्धनाय सा सततं प्रयत्नशीता भवति । वृक्षलताः अपि शकुन्तलायाः कृते समभावं प्रकोटयन्ति । तच्चोक्तम्- **'वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः'**[15] इति। परिगृहगमनवेलायां वनवृक्षाः अपि ताम् अनुमतिप्रदानं

कुर्वन्तीति वर्णितमस्ति अभिज्ञानशाकुन्तले कालिदासेन यथा- **अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः**[16] इति । तस्मिन्नेव काले मानवीयधर्मावलम्बनपूर्वकं दुःखम्रियमाणा लता अपि अश्रूपातान् कुर्वन्ति, यथा- **अपसृतपाण्डुपत्रा मुञ्चन्तयश्रूणीव लताः** इति।

लतावृक्षेषु यदा प्रथमवारं पुष्पोद्गमो भवति तदा शकुन्तला उत्सवं पालयति । मण्डनप्रीयाऽपि सा न कदाऽपि वृक्षात् एकं पत्रमपि चिनोति । प्रतिदिनं वृक्षेषु जलसेचनं विना स्वयं जलपानमपि न करोति । अतः कालिदासः कण्वमुखेन वृक्षान् प्रति वक्ति-

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डना ऽपि भवतां स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सा याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥**[17] इति।

कञ्च पतिगृहगमनवेलायां नवविवाहितकन्यकायाः कृते यथा मित्रवर्गः विविधप्रकाराणि वस्त्राणि प्रयच्छन्ति, तथैव शकुन्तलायाः कृते अपि वण्यवृक्षाः विविधानि आभरणानि प्रदत्तवन्तः । यथा च वर्णितं कालिदासेन अभिज्ञानशाकुन्तले चतुर्थाङ्के-

**क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं**
**निष्ठ्यूतश्चरणोपमोगसुलभो लाक्षारसः केनचित् ।**
**अन्येभो वनदेवताकरतलैरापर्वभागोत्थितै-**
**र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः॥**[18] इति।

पर्यावरणस्य प्रत्येकं वर्णनीयम् अवसरं कालिदासः न त्यजति । अभिज्ञानशाकुन्तले यदा दुष्यन्तं प्रति विदूषकः पृच्छति यत् इदानीं शकुन्तलायाः चित्रे इतोऽपि किम् अवशिष्यते इति । तदा राजा उत्तररूपेण पद्यमिदं वदति, यथा-

**कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी**
**पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।**
**शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः**
**शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥**[19] इति।

एतत्पद्यमाध्यमेन कालिदासः शकुन्तलायाः प्रकृत्यनुगतत्वं प्रतिपादितम् । तदनुसारेण शकुन्तलायाः प्रतिकृतिः तदा एव सम्पूर्णा भविष्यति यदा सा पर्यावरणेन सह समन्विता भविष्यति । यतो हि शकुन्तला तत्र एव तिष्ठति यत्र नदीनां शोभावर्तते । विविधवृक्षसम्बलितः पर्वते यत्र कृष्णसारमृगः स्वपत्न्या सह सानन्दं निवसति । एवं प्रकारेण अभिज्ञानशाकुन्तले पर्यावरणस्य अपरूपसौन्दर्यं वर्णितमस्ति विश्वकविना कालिदासेन।

एवं हि महाकविनाऽनेन स्वकीये रघुवंशे महाकाव्येऽपि मुनिकन्यकाभिः बालवृक्षाणां बाललतानां च सम्बर्धनप्रकारो वर्णितः-

**सेकान्ते मुनिकन्याभिः तत्क्षणोज्झितवृक्षकम् ।**
**विश्वासाय विहङ्गानामालवालाम्बुपायिनाम्॥**[20] इति।

महाकाव्यस्यास्य पञ्चमे सर्गेऽपि महारजः रघुः वनष्पतीनां संरक्षणाय सर्वदैव तत्परः आसीदिति विर्णितं कालिदासेन । तदा स कौत्सं पृच्छति यत्-

**आधारबन्धप्रमुखैः प्रयत्नैः सम्बर्द्धितानां सुतनिर्विशेषम्।**
**क्वचिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम्॥**[21] इति।

मुनिर्वाल्मीकिरपि स्वाश्रमस्य परिवेशं सवुजमयं चकार । स कदाचित् सीतादेवीमपि स्वबलानुरूपैः पयोघटैः आश्रमस्थान् बालवृक्षकान् सम्बर्धयितुम् उपदिशति । यथा-

**पयोघटैराश्रमबालवृक्षान् सम्बर्धयन्ती स्वबलानुरूपैः।**

**असंशयं प्राक्तनयोपपत्तेः स्तनन्धयप्रीतिमवाप्स्यसि त्वम्॥**[22] इति।

किञ्च रामेण रावणवोधानन्तरं कवेः वर्णनायां प्रकृतिमयचिन्तनमुन्मिलितम् । तन्मतानुसारेण श्रीविष्णोः अवताररूपकः कृष्णमेघो रावणरूपामनावृष्टिं दूरीकृत्वा देवतारूपस्य शष्यस्य उत्पादनमाध्यमेन वीणीरूपीबृष्टिं च कारयित्वा तिरोहितः इति । तदुक्तं, यथा-

**रावणावग्रहक्लान्तमिति वागमृतेन सः ।**
**अभिवृष्य मरुत्सश्यं कृष्णमेघस्तिरोदधे॥**[23] इति।

मानवानां दुःखेषु वृक्षा अपि दुःखम्रियमाणा भवन्ति सुखेन च आनन्दमनुभवन्त इति कालिदाससाहित्यदनुभूयते। रामचन्द्रस्य दुःखेषु वृक्षा अपि दुःखिता भवन्तीत्यपि रघुवंशे कालिदासेन वर्णितं यथा-

**ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः।**
**तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान्॥**[24] इति। यथा च-
**विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति।**
**अकरोत्पृथिवीरुहानपि स्रुतशखारसबाष्पदूषितान्॥**[25] इति।

रघुवंशानुसारेण देवदारुवृक्षः वृषभध्वजेन पुत्रीकृतः। तस्य त्वक् केनापि वन्यद्विपेन कण्डूयमानेन उन्मथिता तदा पार्वती क्रुद्धाऽभवत् । तद्रक्षार्थं कुम्भोदरः नियुक्तः, यथा-

**अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।**
**यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः॥**
**कण्डूयमानेन कटं कदाचिद् वन्यद्विपेनोन्मथिता त्वगस्य ।**
**अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः॥**[26] इति।

कुमारसम्भवे अपि हिमालयकन्या पार्वती गौरीशिखरे स्वकीये तपोवने विविधान् वृक्षकान् अवर्धयदिति महाकविकालिदासेन वर्णितम्, यथा-

**अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रववणैर्व्यवर्धयत् ।**
**गृहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति॥**[27] इति।

किञ्च कुमारसम्भवमहाकाव्यस्यास्य पञ्चमसर्गस्थवर्णनानुसारेण पार्वती द्रुमेषु प्रीतिं दधाना तपस्यां करोति स्म, यथा-

**द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपःसाक्षिषु दृष्टमेष्वपि ।**
**न च प्ररोहाभिमुखोऽपि दृश्यते मनोरथोऽस्याः शशिमौलिसंश्रयः॥**[28] इति।

वृक्षाणामवक्षये परिवेशो दूषितो भवतीति कालिदासेनाऽपि प्रतिपादितं स्वकीये महाकाव्ये । कुमारसम्भवे महाकाव्ये वृक्षच्छेदनार्थं विरोधः कृतः। महाकवेः मतानुसारं वृक्षच्छेदका राक्षसा भवन्ति । विषवृक्षस्यापि छेदनं न कर्तव्यमिति कालिदासस्याभिमतमस्ति, यथा-

**इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।**
**विषवृक्षोऽपि संवर्ध्य स्वयं च्छेतुमसाम्प्रतम्॥**[29] इति।

एवं कालिदाससाहित्ये वृक्षारोपणं, वृक्षावसेचनं, वृक्षलतानं, वृक्षसम्बर्धनं, तेषाम् उच्छेदनस्य विरोधश्चेति विषयो वर्णितोऽस्ति । वनस्पतीनां संरक्षणचेनद्वारा प्रायतः पञ्चमहाभूतानां संरक्षणमपि सुकरं भवतीति महाकविना कालिदासेन ज्ञातं

प्रचारितञ्चेति तत्काव्यानां पर्यालोचनेन ज्ञायते । मृत्तिकासंरक्षणे वृक्षा एव प्रमुखस्थानं भजन्ते । वृक्षाणां प्राचुर्य्येण नियमितबृष्टिः सम्भवतीति वैज्ञानिकाऽपि स्वीकुर्वन्ति । वृक्षाणां सद्भावनायां तेजसः नियन्त्रणेऽपि सम्भवतीति विदितचरमेव । एतेषां सद्भावे वायुरपि प्रदूषणमुक्तो भवति । अतः सुखमयजीवनयापनात्मकं पर्यावरणं सुकरं भवतीति कालिदाससाहित्याध्ययनतोऽवगम्यते । तेन कालिदासकालादारभ्य आधुनिककालं पर्यन्तं सर्वेषां जनानां कृते कालिदाससाहित्यं पर्यावरणस्य महत्त्वं तस्य संरक्षणोपायाश्च कान्तासम्मिततयोपदेशद्वारेण प्रशिक्षणं ददातीत्यत्र नास्ति काऽपि विप्रतिपत्तिः। अतः कालिदाससाहित्ये विद्यमानं पर्यावरणचेतनं प्रणिधानयोग्यमस्तीति दिक् ।

**सन्दर्भाः-**


1. सं.सा.इ.पृ-239
2. रसनिष्पत्तितत्त्वालोकः-पृ-7
3. श्रीमद्भगवद्गीता-7.4
4. ऋग्वेद-मण्डल-1,सूक्त-10 मन्त्र. सं. 6-8 इति।
5. शु.य.सं-36-16
6. मेघ-1.5
7. अभि.-1.1
8. माल.1.8
9. अभि. 1-15
10. अभि.1.
11. अभि. 1. पृ-35
12. अभि. 1. पृ. 36
13. अभि.
14. अ.शा. 4 पृ-123
15. अभि.1.20
16. अभि. 4. 10
17. अभि.4.10
18. अभि.4.4
19. अभि. 6.17
20. रघु.-1.51
21. रघु.-5.6
22. रघु.-14.76
23. रघु. -10.48 24.
24. रघु-12-14
25. रघु.-8-70
26. रघु. 2. 36-37
27. कुमार.-5.14
28. कुमार-5.60
29. कुमार.2.55
30. ऋग्वेदसंहिता
31. अभिज्ञानशाकुन्तलम् कालिदासकृतम्, राष्ट्रिय-संस्कृतसंस्थानम्, नवदेहली, प्र. संस्करणम्
32. ऋतुसंहारम् कालिदासकृतम्, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
33. कुमारसम्भवम् कालिदासकृतम्, चौखम्बा विद्याभवनम्, वाराणसी, 221001
34. मालविकाग्निमित्रम् कालिदासकृतम्, चौखम्बा कृष्णदास अकादमी, वारणसी-221001
35. मेघदूतम् कालिदासकृतम्, चौखम्बा विद्याभवनम्, वाराणसी, सं. 2003
36. रघुवंशमहाकाव्यम् कालिदासकृतम्, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी, प्र. संस्करणम्
37. रसनिष्पत्तितत्त्वालोकः भागवतप्रसादत्रिपाठी, श्रीसदाशिवसंस्कृतविद्यापीठम्, पुरी, प्र.संस्करणम्
38. शुक्लयजुर्वेदसंहिता मोतिलाल बनारसीदास, मुम्बई, प्रथमसंस्करणम्
39. श्रीमद्भगवद्गीता गीताप्रेस, गोरखपुर, चतुर्थसंस्करणम्-2016
40. संस्कृतसाहित्येतिहासः लोकमणिदाहलः, चौखम्बा कुष्णदास अकादमी, वाराणसी-2011